तथास्मनीति"। अत्रेदं बोध्यम् विशेष्यतेऽनेनेति व्युत्पत्त्या विशेषणपदं भेदाभेदान्यतरसम्बन्धेनान्वयिविशेषणपरं तत्र कारकादीनां भेदसम्बन्धेन क्रियायामन्वयात् भेदविशेषणत्वम् स्तोकं पचतीत्यादौ तु किञ्चित्त्वरूपधात्वर्थफले, द्रुतं गच्छतीत्यादौ धात्वर्थव्यापारे मत्यादौ च अभेदेनान्वयात् स्तोकादेरभेदविशेषणत्वम्। अत्रायं भेदः साध्यरूपक्रियाया विशेषणत्वे तस्याः लिङ्गसंख्यान्वयित्वाभावेन तद्विशेषणस्य सामान्यत्वात् क्लीवता उत्सर्गतोभावाख्यातवदेकवचनान्तता च तेन स्तोकं पच्यते इत्यादि साधु। घञाद्यन्ते तु साध्यसिद्धोभयक्रिययोर्धातुप्रत्ययाभ्यां बोधनस्य क्रियाशब्दे दर्शितत्वेन धातुबोध्यसाध्यरूपक्रियाविशेषणत्वविवक्षायामेकवचनक्लीवता घञवाच्यसिद्धक्रियान्वयविवक्षायां तु विशेष्यस्य लिङ्गसंख्यान्वयित्वेन तद्विशेषणस्य द्विवचनपुंस्त्वादि। अतएव "सञ्चारो रतिमन्दिरावधि सखी कर्णावधि व्याहृतमिति" "आगमोनिष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो" इति च प्रयोगः संगच्छते। फलविशिष्टस्य कर्मणः कर्मसंज्ञाविधानेन व्यपदेशिवद्भावपरिभाषया साध्यक्रियाविशेषणस्य कर्मत्वम् तेन स्तोकमीशब्दस्य कारकपूर्व्वकत्वात् यण्। तत्र पदसाधुतामात्रार्थं द्वितीयामात्रविधाने तत्र स्यात् इति बोध्यम्। अस्य च एकवचनान्ततेत्युक्तिरप्यौत्सर्गिकी क्वचित् द्विवचनादिप्रयोगोभवत्येव उक्तञ्च हरिणा "एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रय इति"। उत्सर्गतएकत्वे सत्यपि साधनाश्रयसंख्ययाख्याते क्रिया भिद्यते इत्यर्थः। अत्राख्यात इत्युपादानात् आख्यातार्थाश्रयसंख्ययैव क्रियाभेदो नतु तृतीयाद्युपस्थाप्याश्रयसंख्ययापि तेन चैत्राभ्यां सुप्यते इत्यादौ न द्विवचनादि, तथा नामार्थलिङ्गेन क्रियाभेदो लिङ्गस्येतरपदोपात्तत्वात्। एवञ्च लिङ्गसंख्यानन्वयित्वरूपासत्वलक्षणे संख्याविशेषस्य साक्षादनन्वयित्वविवक्षणाल्लिङ्गमात्रस्य वा तथात्वविवक्षणान्न दोष इत्यनुसन्धेयम्। उष्ट्रासिका आसन्ते हतशायिकाः शय्यन्ते इत्यादि भाष्योदाहरणे च उपमानोष्ट्रासनादिबाहुल्येनोपमेयासनादेर्बाहुल्यस्य विवक्षणाद्भावेऽपि बहुवचनादीत्याकरे स्पष्टम्। उष्ट्रासिकापदस्य द्वितीयाबहुवचनान्तं क्रियाविशेषणतया द्वितीयोत्पत्तौ बाहुल्ये नैवोपमानविवक्षणात् बहुवचनम्" अत्र मतभेदेन शब्दशक्तिप्र० विशेषोदर्शितो यथा "भावविहितानामपि घञादीनामुक्तैव गतिः तत्रापि भावपदस्य धात्वर्थस्वरूपपरत्वात्। अन्यथा पाकं पश्येत्यादौ धात्वर्थस्य पचनादेः कर्मत्वादावन्वयापत्तेः सुबर्थे धात्वर्थस्यान्वयस्याव्युत्पन्नत्वात् इत्यमेव च स्तोकः पाक इत्यादिप्रयोगस्य परिशिष्टाद्युक्तस्य प्रामाण्यम् अन्यथा स्तोकादीनां धात्वर्थे विशेषणत्वे नियमतो द्वितीयापत्तेः अतएव "सञ्चारोरतिमन्दिरावधि सखीकर्णावधि व्याहृतम्" इत्यादिकं काव्यम् "आगमोनिष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो" इत्यादिः स्मृतिश्च सङ्गच्छतइति नव्याः। स्त्रोत्तरप्रत्ययार्थसाकाङ्क्षस्यैव धातोरर्थे विशेषणतापन्नस्य बोधने तदर्थकनाम्नोद्वितीयाद्यपेक्षा नतु धातुमात्रस्य तथाच स्तोकः पाक इत्यादिरेव प्रमाणं नतु स्तोकं पाकइत्यादिः। घञ्रूपक्रियाया विशेषणं कर्मत्वाद्यनुशिष्टेरपि तत्रैव तात्पर्य्यात्। अतएव स्तोकं स्थीयते साधु गतं चकितं द्रष्टव्यमित्यादौ धात्वर्थस्य तिङाद्यर्थकालादिसाकाङ्क्षत्वान्न तद्विशेषणस्य द्वितीयाद्यनुपपत्तिरिति तु शाब्दिकसम्प्रदायः"।

भेदसम्बन्धेन क्रियायामन्वयिविशेषणे तु पौनःपुन्येन गच्छति अतिशयेन पचति समेनैति विषमेनैतीत्यादिषु प्रकृत्यादि० तृतीया। क्वचित् धात्वर्थस्य करणत्वेनान्वये तद्विशेषणीभूतात् तृतीयादि यथा "स्वर्गकामोऽश्वमेधेन यजेत" इत्यादौ यागेनेष्टं भावयेदिति भाट्टमते यागस्य करणतया भावनायामन्वयात् अश्वमेधस्य तत्राभेदविशेषणत्वेन तद्वद्विभक्तिकत्वम्। अन्यमते तु नाम्ना शिव इत्यादिवत् अभेदे तृतीयेति भेदः। मुग्धबोधे "कर्मक्रियाविशेषणेत्यादि" कर्मसंज्ञाद्वितीयाविधानस्य अभेदान्वयिविशेषणपरम्। भेदविशेषणे तु तृतीयैव। तत्रायं विशेषः क्रियायाम् अभेदसम्बन्धेनान्वयविवक्षायां द्वितीया। अभेदप्रकारकान्वयविवक्षायां तु तृतीया।

**क्रियाशक्ति** स्त्री क्रियैव शक्तिः। जगदुत्पत्तिसाधने परमेश्वरस्य शक्तिभेदे। सा च ब्राह्मीरूपा यथोक्तं शा० ति० पदार्थादर्शे च "सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततोनादोनादाद्विन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः। विन्दुर्नादोवीजमिति तस्य भेदाः समीरिताः। विन्दुः शिवात्मको वीजं शक्तिर्नादस्तयोर्मिथः। समवायः, समाख्यातः सर्व्वागमविशारदैः। रौद्री विन्दोस्ततोनादाज्ज्येष्ठा वीजादजायत। वामा, ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः। ते ज्ञानेच्छाक्रियात्मानो वह्नीन्दु-